संस्कृत-वार्ता:

03.09.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी ब्रुनेयी-सिङ्गापुर्-देशयोः त्रिदिवसीय-यात्रायाम् अस्ति। अत्रावसरे असौ अवदत् यत्, उभौ देशौ भारतस्य एक्ट-ईस्ट-नीतौ, भारत-प्रशान्त-दृष्टिकोणइत्यस्मिन् च महत्त्वपूर्णौ सहभागिनौ स्तः।
- राष्ट्रपतिपदासीना द्रौपदीमुर्मुवर्या अभिव्यक्तवती यत् सर्वैः शैक्षणिकसंस्थानैः बालिकानां कृते सुरक्षापूर्वकं वातावरणं निर्मातव्यम्।
- विश्वबैंकइत्यनेन वर्तमान-वित्तवर्षाय भारतस्य सकल-गृह-उत्पादस्य वृद्धिमूल्यं सप्त-प्रतिशन्मितं यावत् कृतम् अस्ति ।
- भारतस्य रोहन-बोपन्नायाः इंडोनेशियायाः अल्दिला-सुत्जियादी-इत्यनयोः युगलं अमरीका-ओपन-टेनिस-क्रीडायाः प्रागुपान्त्यचक्रं प्रविष्टम् ।

<u>प्रधानमन्त्री-सिङ्गापुर-ब्रुनेई-यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी ब्रुनेयी-सिङ्गापुर्-देशयोः स्वकीयायाः यात्रायाः प्रथमचरणे अद्य अपराह्णे बन्दर्-सेरी-बेगवान-नगरं प्राप्तवान्। विशिष्टरूपेण प्रधानमन्त्रिणः मोदी-वर्यस्य आगमनसमये युवराज्ञा हाजी-अल्-मुहतादी-बिल्लाह्-वर्येण तस्य स्वागतसत्कारं कृतम् । ब्रुनेई-अन्ताराष्ट्रिय-विमानस्थानके श्रीमोदी-वर्यस्य औपचारिकं स्वागतम् अभवत्। भारतीयप्रधानमन्त्रिणः ब्रूनेय्-देशस्य एषा प्रथमा द्वैपाक्षिकयात्रा अस्ति। अवधेयं यत् भारत-ब्रूनई-देशयोः मध्ये राजनैतिक-सम्बन्धानां स्थापनायाः चत्वारिंशत्तमस्य वार्षिकोत्सवस्य अवसरे एषा यात्रा भवति। इतः पूर्वं स्वकीये प्रस्थान-वक्तव्ये श्रीमोदिना आशा प्रकटिता यत् अनया यात्रया ब्रुनेई-सिङ्गापुर्-देशाभ्यां, व्यापकेन आसियान्-प्रदेशेन च सह भारतस्य सहभागित्वम् इतोऽपि सुदृढं भविष्यति । सः अवदत् यत्, उभौ देशौ भारतस्य एक्ट-ईस्ट-नीतौ, भारत-प्रशान्त-दृष्टिकोण इत्यस्मिन् च महत्त्वपूर्णौ सहभागिनौ स्तः। सः अवदत् यत्, भारत-ब्रूनई इत्युभाभ्यां परस्पर-राजनैतिक-सम्बन्धानां चत्वारिंशत् वर्षाणाम् उत्सवः मान्यते अपरत्र सः सुल्तान्-हाजी-हसनल्-बोल्किया इत्यनेन , राजपरिवारस्य अन्यैः सम्मानितैः सदस्यैः च सह मेलनस्य प्रतीक्षायाम् अस्ति । श्रीमोदी श्वः स्वयात्रायाः द्वितीये चरणे सिङ्गापुर-देशं गमिष्यति। सः अकथयत् यत् सः राष्ट्रपतिः थर्मन्-षण्मुगरत्नं, प्रधानमन्त्री

लारेन्स्-वोङ्ग्, वरिष्ठमन्त्री ली-सिएन-लूंग्, वरिष्ठमन्त्री गोह्-चोक्-तोङ्ग् इत्येतान् मिलितुं प्रतीक्षति।

## राष्ट्रपतिः पुणेयात्रा

राष्ट्रपतिपदासीना द्रौपदीमुर्मुवर्या अभिव्यक्तं कृतवती यत् सर्वैः शैक्षणिकसंस्थानैः बालिकानां कृते सुरक्षापूर्वकं वातावरणं निर्मातव्यं यतो हि ताः देशस्य विकासस्य अभिन्नाङ्गत्वेन भागं वहन्ति । राष्ट्रपतिः अद्य पुणेनगरे सिम्बॉसिस-विश्वविद्यालयस्य एकविंशतितमे दीक्षान्तसमारोहे सम्बोधयन्ती आसीत् । अत्रावसरे अनया लैङ्गिक-समानतां प्रति विश्वविद्यालयस्य प्रयासाः प्रशंसिताः। अपि च एकादश स्वर्णपदकविजेतृषु अष्टमहिलाः सन्ति इति उररीकृत्य उपक्रमाः अपि अभिनन्दिताः ।अत्रावसरे शिक्षामन्त्री चन्द्रकान्तपाटिलः उपस्थितः आसीत्। अवधेयं वर्तते यत् एतस्मिन् विश्वविद्यालये पञ्चाशीतिः देशेभ्यः समागताः छात्राः पठन्ति, ये राष्ट्रपतिं पुरतः स्वदेशस्य ध्वजार्पणं कृतवन्तः ।

## विश्वबैंक-आर्थिकानुमानम्

विश्वबैंक इत्यनेन वर्तमान-वित्तवर्षाय भारतस्य वृद्धेः पूर्वानुमानं षट्-दशमलव-षट्-प्रतिशन्मितततो सम्वर्ध्य सप्त-प्रतिशन्मितं यावत् कृतम् अस्ति। अन्ताराष्ट्रिय-वित्तीय-संस्थानेन अवोचत् यत् देशस्य आर्थिकवृद्धिः मध्यमावधौ प्रबला भविष्यति, या निजोपभोगः निवेशः चेत्यादिभिः प्रमुखैः कारकैः प्रेरिता अस्ति। इदं वक्तव्यम् अन्ताराष्ट्रिय-मुद्रा-कोषस्य आशान्वितं दृष्टिकोणं द्योतयति , येन वर्तमानवित्तवर्षस्य कृते भारतस्य सकल-गृहोत्पादस्य वृद्ध्यानुमानमपि संशोध्य विंशत्याधार-अङ्कैः सह सम्वर्ध्य सप्त-प्रतिशन्मितं यावत् कृतम् आसीत्।

## झारखण्ड-भाजपा-दलम्

झारखण्ड-भाजपा-दलेन झारखण्डे प्रचण्डातपकारणेन आबकारि-आरक्षिबलानां पदाय शारीरिक-परीक्षणावधौ मृतकानां पीडितेभ्यः प्रत्येकं परिवार-सदस्येभ्यः एक-लक्ष-कोटि-रूप्यकाणाम् अनुग्रह-राशिं प्रदातुं घोषणा कृता अस्ति। परीक्षायाः अवधौ द्वादश-प्रत्याशिनां मृत्युरभवत् । झारखंड-भाजपा-विधानसभा-निर्वाचनस्य सह-प्रभारी असमस्य मुख्यमंत्री हिमंत-बिस्वा-सरमा च सबलं प्रोक्तवान् यत् भाजपा-दलं राष्ट्रिय-मानवाधिकार-आयोगं शारीरिक-परीक्षणे सम्मिलितानां प्रत्याशिनां मृत्योरन्वीक्षणं विधातुं

सम्प्रार्थयिष्यति । श्रीसरमा प्रोक्तवान् यत् हेमंत-सोरेन-सर्वकारेण मृतकानां परिवारेभ्यः पञ्चाशत्-लक्षरुप्यकाणां साहाय्यराशिः , प्रत्याशिनां परिजनाय आजीविका च प्रदातव्या । यदि सर्वकारः इदं कर्तुं विफलः भविष्यति चेत् भाजपादलस्य सत्तारूढे सति तेषां परिवारेभ्यः आजीविकाप्रदान करिष्यते ।ध्यानास्पदं वर्तते यत् झारखण्डे अस्मिन् एव वर्षे विधानसभा-निर्वाचनं वर्तते ।

<u>जलप्लावः</u>

आन्ध्रप्रदेशे विजयवाडाजनपदे जलौघस्थितिः गभीरा दरीदृश्यते। कृष्णानदीं निकषा सर्वाणि क्षेत्राणि प्रभावितानि सन्तीति। केषुचित् तु भागेषु जलस्तरं शीर्षतां प्राप्नोति। जलौघस्थितिं दृष्ट्वा मुख्यमन्त्रिणः चन्दर्बाबू- नायडोः नेतृत्वे आन्ध्रप्रदेश- प्रशासनेन साहाय्योद्धारकार्याणि द्रुतगत्या विधीयन्ते। जलौघस्थित्या षोडशजनाः मृत्युम् उपगताः। अत्रावधौ भारतर्तुविज्ञानविभागेन गुजरातराज्ये अतिवृष्टेः सम्भावना अथ च पश्चिमीय- मध्यप्रदेशे महती वृष्टिः च प्रकल्पिता। ऋतु-विभागेन असम-मेघालय-नागालैण्ड - मणिपुर - मिजोरम- त्रिपुरा-केरल - माहे - पश्चिमोत्तरप्रदेशेष्वपि श्वः यावत् महती वृष्टिः पूर्वानुमानिता ।

<u>गडकरी - सुरङ्ग</u>

मार्गपरिवहन-राजमार्गमन्त्री नितिनगडकरी प्रावोचत् यत् मार्गेषु जनानां सुरक्षा सर्वोपरि अस्ति इति । अद्य नवदिल्ल्यां टनलिंगइण्डिया-इत्याख्यस्य द्वितीय संस्करणं अभिभाषयन् श्रीगडकरी अवदत् यत् वृष्टि - भूस्खलन-जलप्लाव-इत्येतानि सङ्कटानि विरुध्य स्थायि-समाधानस्य आवश्यकतायै बलं प्रदत्तवान् । श्रीगडकरी अग्रे प्रत्यपादयत् यत् प्रशासनेन भारतं पञ्च- ट्रिलियन-डॉलर-मितस्य अर्थव्यवस्थां निर्मातुं कार्यं समाचर्यते। असौ परियोजनानां सफलतायै सिद्धप्राप्त-प्रौद्योगिक्याः आर्थिक-व्यवहार्यतायाः निर्मित-उत्पादस्य च विपणनेऽपि सुदृढतया बलं दत्तवान् । सम्मेलनावधौ श्रीगडकरी फिक्की-क्रिसिल - इत्यस्य एकस्य ज्ञानप्रतिवेदनस्यापि अनावरणं कृतवान्।

<u>वृक्षारोपणम्</u>

एक-पेड़-माँ-के-नाम इति एतस्य वृक्षारोपणाभियानस्य अन्तर्गतं साम्प्रतं यावत् द्विपञ्चाशत-कोटितः अधिकाः वृक्षाः रोपिताः । एकस्मिन् सामाजिक-सञ्चार-सन्देश-पटले पर्यावरण-वन-जलवायुपरिवर्तनमन्त्री भूपेन्द्रयादवः प्रख्यापितवान् यत् अभियानमिदं कीर्तिमत्-रूपेण समङ्कितम् । ध्यातव्यमस्ति यत् विश्वपर्यावरण-दिवसावसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना अभियानमिदं समारब्धम् ।

## अमरीका-ओपन-टेनिस-क्रीडा

भारतस्य रोहन-बोपन्नायाः इंडोनेशियायाः अल्दिला-सुत्जियादी इत्यनयोः युगलं अमरीका-ओपन-टेनिस-क्रीडायाः प्रागुपान्त्यचक्रं प्रविष्टम् । बोपन्ना-सुत्जियादी इत्यनयोः युगलेन द्वितीय-चरणस्य क्रीडायाम् ऑस्ट्रेलियायाः जॉन-पीयर्स चेक-गणराज्यस्य केटरीना-सिनियाकोवा-इत्यनयोः युगलं क्रमशः षट्-अङ्कान्-विरुध्य शून्यं क्रीडनाङ्केन, षट्-अङ्कान् विरुध्य सप्त-क्रीडनाङ्कैः, सप्ताङ्कान् विरुध्य दश-क्रीडनाङ्कैः च पराजितम् । अपरत्र , बोपन्ना-मैथ्यू-एब्डेन इत्यनयोः युगलेन तृतीयचरणे स्वकीयं स्थानं सुनिश्चितम् कृतमस्ति ।

।। इति वार्ताः।।